DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

ADVANCED SANSKRIT
PART 2

# WEEK TWO

# DIAMOND MOUNTAIN UNIVERSITY

Advanced Sanskrit, 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

## Winter Term, Class Schedule

**WEEK TWO: Tuesday, Feb. 8, 2007 1:00 – 4:00 PM**

A. Review quiz covering noun declensions
B. Overview of the future systems (Whitney #931- 950)
C. Review of homework from class 1
D. Introduction to Arya Nagarjuna's मूलमध्यमककारिका, chapter 10

**HOMEWORK FOR WEEK TWO:**

1. Review the future systems in Whitney
2. For each of the verses below from Arya Nagarjuna's मूलमध्यमककारिका, provide a word by word English translation. In addition, identify for each word what grammatical part of speech it is. If it's a noun, identify its gender, case, and number (e.g., सद्भूतः, masculine, nominative, singular). If it's a verb, identify its verbal root, tense, voice, person and number (e.g. करोति, third person singular, present parasmaipadi, active, from the root कृ ).

अग्नीन्धनपरीक्षा नाम दशमं प्रकरणं

यदिन्धनं स चेदग्निरेकत्वं कर्तृकर्मणोः।
अन्यश्चेदिन्धनादग्निरिन्धनादप्यृते भवेत्॥ १

नित्यप्रदीप्त एव स्यादप्रदीपनहेतुकः।
पुनरारम्भवैयर्थ्यमेवं चाकर्मकः सति॥ २

परत्र निरपेक्षत्वादप्रदीपनहेतुकः।
पुनरारम्भवैयर्थ्यं नित्यदीप्तः प्रसज्यते॥ ३

तत्रैतस्मादिध्यमानमिन्धनं भवतीति चेत्।
केनेध्यतामिन्धनं तत्तावन्मात्रमिदं यदा॥ ४

अन्यो न प्राप्स्यते ऽप्राप्तो न धक्ष्यत्यदहन् पुनः।
न निर्वास्यत्यनिर्वाणः स्थास्यते वा स्वलिङ्गवान्॥ ५

अन्य एवेन्धनादग्निरिन्धनं प्राप्नुयाद्यदि।
स्त्री संप्राप्नोति पुरुषं पुरुषश्च स्त्रियं यथा॥ ६

अन्य एवेन्धनादग्निरिन्धनं काममाप्नुयात्।
आग्नीन्धने यदि स्यातामन्योन्येन तिरस्कृते॥ ७

यदीन्धनमपेक्ष्याग्निरपेक्ष्याग्निं यदीन्धनं।

कतरत्पूर्वनिष्पन्नं यदपेक्ष्याग्निरिन्धनं॥ ८

यदीन्धनमपेक्ष्याग्निरग्नेः सिद्धस्य साधनं।

एवं सतीन्धनं चापि भविष्यति निरग्निकं॥ ९

यो ऽपेक्ष्य सिध्यते भावस्तमेवापेक्ष्य सिध्यति।

यदि यो ऽपेक्षितव्यः स सिध्यतां कमपेक्ष्य कः॥ १०

यो ऽपेक्ष्य सिध्यते भावः सो ऽसिद्धो पेक्षते कथं।

अथाप्यपेक्षते सिद्धस्त्वपेक्षास्य न युज्यते॥ ११

अपेक्ष्येन्धनमग्निर्न नानपेक्ष्याग्निरिन्धनं।

अपेक्ष्येन्धनमग्निं न नानपेक्ष्याग्निमिन्धनं॥ १२

आगच्चत्यन्यतो नाग्निरिन्धने ऽग्निर्न विद्यते।

अत्रेन्धने शेषमुक्तम् गम्यमानगतागतैः॥ १३

इन्धनं पुनरग्निर्न नाग्निरन्यत्र चेन्धनात्।
नाग्निरिन्धनवान्नाग्नाविन्धनानि न तेषु सः॥ १४

अग्नीन्धनाभ्यां व्याख्यात आत्मोपादानयोः क्रमः।
सर्वो निरवशेषेण सार्धं घटपटादिभिः॥ १५

आत्मनश्च सतत्त्वं ये भावानां च पृथक् पृथक्।
निर्दिशन्ति न तान्मन्ये शासनस्यार्थकोविदान्॥ १६